# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-3) | **प्रश्नपत्रम्–५** (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड- CE- 5.3.3.** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०८/१२/२०१८ | **सन्दर्भग्रन्थः**– देवीभागे प्रथमद्वितीयस्कन्धौ– स्कन्क पु.मा.सहितम् | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ एकस्य श्लोकस्य सान्वयसन्दर्भप्रसङ्गं व्याख्या कार्या ।** **०५**

१. सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥

२. कुपुत्रेणान्वयो नष्टो जन्म नष्टं कुभार्यया ।
कुभोजनेन दिवसः कुमित्रेण सुखं कुतः ॥

**प्र–२ कस्याप्येकस्य विस्तरेण वर्णनं कुरुत ।** **१०**

१. देवीभागवतमाहात्म्ये ऋषभ एवं सूतस्य संवादप्रसङ्गं विस्तरेण विवेचयत ।

२. सुद्युम्नकथां यथाग्रन्थं निरूपयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ द्वयोरेकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. इति संचिन्त्य मनसा पद्मनालगतोऽब्जजः ।
जगाम शरणं विष्णुं मनसा दुःखनाशकम् ॥

२. सुद्युम्नो नाम भूपालः सत्यवादी जितेन्द्रियः ।
सैन्धवं हयमारुह्य चचार मृगयां वने ॥

**प्र–४ एकस्य सविस्तरं वर्णनं कुरुत ।** **१०**

१. मधुकैटभवधप्रसङ्गं वर्णयत ।

२. शुकदेवजन्मकथाप्रसङ्गं यथाग्रन्थं विवेचयत ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य श्लोकस्य सन्दर्भप्रसङ्गं व्याख्या कार्या ।** **०५**

१. भोजनेच्छां सुखेच्छां च शय्येच्छामात्मजस्य च ।
यती भूत्वा कथं कुर्याद्विकारे समुपस्थिते ॥

२. वेदविस्तारकरणाद्व्यासनामाऽभवन्मुनिः ।
पुराणसंहिताश्चक्रे महाभारतमुत्तमम् ॥

**प्र-६ एकस्य यथाग्रन्थं सविस्तरं वर्णनं कुरुत।** **१०**

१. श्रीशुकजनकयोः संवादं सविस्तरं प्रतिपादयत।

२. मत्स्यगन्धावृत्तान्तं सविस्तरं निरूपयत।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ द्वयोरेकस्य ससन्दर्भं व्याख्या कार्या।** **०५**

१. श्रीमद्भागवतं पुण्यं नानाख्यानकथान्वितम्।
द्वैपायनमुखोद्भूतं पञ्चलक्षण संयुतम्॥

२. तेन श्रुतेन ते राजंश्चिते शान्तिर्भविष्यति।
पितृणां चाक्षयः स्वर्गः पुराणश्रवणाद् भवेत्॥

**प्र-८ एकस्य सविस्तरेणोत्तरं लिखत।** **१०**

१. पाण्डवानां जन्मवृत्तान्तं यथाग्रन्थं निरूपयत।

२. आस्तिकऋषेः जीवनवृत्तान्तपूर्वकदेवीभागवतमहिमावर्णनं कुरुत।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत।** **१०**

१. वर्णरूपाः कति? के च ते?

२. ततो जयमुदीरयेत् अर्थात् किम्?

३. पुरुषार्थाः कति? के च ते?

४. देवीभागवतयज्ञः कति दिनात्मकः ?

५. प्रथमस्कन्धे कति अध्यायाः?

६. गाङ्गेयः कः ?

७. विदुरस्य पितुः नाम किम्?

८. बुधस्य मातुः नाम किम्?

९. मिथिलानरेशः कः ?

१०. पाण्डवेषु वायुपुत्रः कः ?

११. मगधराजः कः ?

१२. व्यासमुनिः कुत्र आसक्तः ?

१३. पृथापुत्रः क आसीत्?

१४. भुवि भारते के दुःखिताः दृश्यन्ते?

१५. द्वितीयस्कन्धे कति अध्यायास्सन्ति?

--००--